लघु कौमदी

लेखक - वरदराज
विषय - व्याकरण
पेज - 25
- 31 X 12.5 X 0.5 c.m.

आरिक्रम लक्रिम, धाविक्रय लाविक्रम रचानिक्रम

... ...

श्री वरदराज महाविरचितायां लघु कौमद्यां तिङ्न्ते प्रक्रियासमाप्तम्

Note → पेज फटे हुए व चिपके हुए है।

[illegible]

अरित्रम् लवित्रम् धवित्रम् सवित्रम् खनित्रम् सहित्रम् चरित्रम् पुवः संज्ञायाम् प
वित्रम् हुत्वा पाणि भिस्सुदिसा धवा अष्टं तुएर करोती कर्तृ: चर्षु: चापुर्गेदस्त जायुरो धधम्
म्रापु-पित्रम् स्याृः साध्नोति परं कार्यमिति साधु: आशु: शीघ्रमित्यादि उणादयो बहुल
म् एते वर्त्तमाने संज्ञायां च बहुलं स्युः केचिदविहिता अप्यूह्याः संज्ञासु धातुरूपाणि प्रत्ययाः
श्चततः परं कार्याद्विद्यादनुबंधमेतच्छास्त्रमुणादिषु तुमुन्ण्वुलौ क्रियायां क्रियार्थायां
क्रियार्थायामुपपदे धातोरेतौ स्तः मान्तत्वादव्ययत्वम् कृष्णं द्रष्टुं याति कृष्णं दर्शको याति का
लसमयवेलासु तुमुन् कालः समयो वेला वा भोक्तुं भावे सिद्धौ वस्याध्याहारेण भावे वाच्ये धा
तोर्घञ् पाकः अकर्त्तरि च कारके संज्ञायाम् कर्तृभिन्ने कारके घञ् घञि च भावकरण
यो: रंजेर्नलोपः रागः अनयोः किं रज्यत्यस्मिन्निति रंगः निवासचितिशरीरोपसमा
धानेष्वादेश्च कः एषु चिनोतेर्घञादेश्च कः उपसमाधानं राशीकरणं निकायः काय

पः कापः गोमयपति कापः एरच् इवर्णान्तादच् चयः जयः अदोरप् अवर्णान्तादप्स्मात्
करः गरः शारः ववः लवः स्तवः पवः घञर्थे कविधानं अस्थः विघ्नः द्रुतः ताक्रिः नावेस्त
भावात् क्तौ नित्यन्तिस्त्रिया क्तिः अनव्यथान्यान्नि हेत्स्यर्थे पाकेनन्निहेत्ते पत्रिमं डुवप् उप्त्रिमं डु
तः ट्वितोऽथुच् टुवेपृ कंपने वेपथुः श्वयथुः यजयाचयतविच्छप्रच्छरक्षो नङ् यज्ञः याञ्चः य
त्नः छ्वोः शूठ् नु नासिके च स तु कच्छस्य वस्य च श ऊठ् एतौ आदेशौ स्तो नुनासिके कौ क्वौ
दौ क्ङिति च विश्नः प्रश्नः रक्ष्णः स्वपो नन् स्वप्नः उपसर्गे घोः किः प्रधिः उपाधिः स्त्रियां
क्तिन् स्त्रीलिंगे भावादौ क्तिन् घञोपवादः कृतिः अस्त्रादिभ्यः क्तिन्निष्ठावद्वाच्यः तेन
न त्वम्र् कीर्णिः गीर्णिः लूनिः धूनिः पूनिः संपदादिभ्यः क्विप् संपत् विपत् आपत्
क्तिन्नपीष्यते संपत्तिः विपत्तिः आपत्तिः ऊतियूतिजूतिसातिहेतिकीर्तयश्च एते
निपात्याः हनः क्यप् हत्या शयवहजः चा क्तिन् अकर्तरि प्रक्रिया प्रकृतिः इच्छा एष

निपातोऽयम् अग्रस्य पात् अग्रपातेभ्यः स्त्रियामकारः अग्रपः चिकीर्षा ग्रहकाम्या गु
रोश्च हलः गुरोमतो हलंतात् स्त्रियामकारः प्रत्ययः ईहा ऊहा एषा स अपेक्षा पुंवत् असाप
वादः कारणा नंतस्य केभावेतो लक्ष्य च हस्तिते हस्तलुम् ऊमि संज्ञायां घः आयेण घा दे
घेमुपसर्गस्य हिंग्रम्न उपसर्गात् न स्वहाद्रेऊ स्वोघेछदः अहातिकं समुद्धादः आ
ऊर्वस्य स्विन्निसाकारः अवे तॄस्त्रोर्घञ् अवतारः अवस्तारः जवनिकाः स्मरः हल
श्च हलंतात् घञ् घापवादः रमंते योगिनोऽस्मिन्निति रामः अपमृज्यतेऽनेन व्याधि
दिकमपामार्गः ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ईषद्दुःखसुखार्थेषु उपपदेषु खल् तयो
रेवेति भावे कर्मणि च ईषत्करः दुष्करः सुकरः भवता ईषत्करः आतो युच् खलोपवादः ई
षत्पानः सोमो भवता दुष्पानः सुपानः अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा इति
पूजार्थं प्रतिषेधार्थयोरलंखल्वोरुपपदयोः क्त्वा स्यात् अलंदत्वा घुमास्थेतीत्वं पा
त्वा खलु अलं खलोः किं प्राकपीः प्रतिषेधयोः किं अलंकारः समानकर्तृकयोः पूर्व

४

काले समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानधातोः क्त्वा भुक्त्वा व्रजति छित्वमपि
पामकं स्नात्वा भुक्त्वा पीत्वा व्रजति न क्त्वा सेट् सेट् क्त्वा कित् न स्यात् सेट् किं हत्वा रलो
वुपधाद्धलादेः संश्च ईवर्णोवर्णोपधाद्धलादेः रलंतात्सेटः क्त्वा सनौ सेटौ वा कितौ स्तः
द्युतित्वा द्योतित्वा लिखित्वा लेखित्वा वुपधात् किं वर्तित्वा रलः किं सेवित्वा हलादेः किं ए
षित्वा सेट् किं भुक्त्वा उदितो वा उदितः परस्य क्त्वा इड् वा शमित्वा शान्त्वा देवित्वा द्यूत्वा दधा
तेर्हिः हित्वा जहातेश्च क्त्वि हित्वा हाङस्तु हात्वा समासेन ञ्पूर्वे क्त्वो ल्यप् अव्ययपूर्वे पदेन
क्त समासे क्त्वो ल्यबादेशः प्रकृत्य अनञ् किं अकृत्वा अव्ययपूर्वे पदात् किं परमकृ
त्वा आभीक्ष्ण्ये णमुल् च पौनःपुन्ये धात्वर्थे क्त्वा विषये णमुल् च स्यात् निस्त्वी प्रत्ययो आभीक्ष्ण्ये
वीप्सायां च धातोः परस्य द्वित्वं स्यात् आभीक्ष्ण्यं पत्तिः ते ष्व्यपसंज्ञक दहते लेश्च पचति
म पचति स्मारं स्मारं नमति गं स्मृत्वा स्मृत्वा पायं पायं भोजं भोजं श्रावं श्रावं अन्यथैवं क
थमित्थं सु सिद्धाप्रयोगश्चेत् एवं कृञो णमुल्स्यात् सिद्धाप्रयोगो यस्य एवंभूतश्चेत् कृञ् क १२

चित्वात्स्वयोग्य न हि स्पर्धः अत्र णकारं एवंकारं कर्णकारं इत्यंकारं इत्यं उत्ते इत्यर्थः सि
द्धेति विं क्रिया न्यायाहृता उत्के इति कुलं किंच प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे
प्रथमा नियतोपस्थितिकः प्रातिपदिकार्थः मात्रशब्दस्य प्रत्येकं योगः प्रातिपदिकार्थ
मात्रे लिंगमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात् प्रातिपदिकार्थमात्रे उच्चैः नीचैः कृ
ष्णः श्रीः ज्ञानं लिंगमात्रे तटः तटी तटं परिमाणमात्रे द्रोणो व्रीहिः वचनं संख्या एकः
द्वौ बहवः संबोधने च हे राम कर्तुरीप्सिततमं कर्म कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्म
संज्ञं स्यात् [illegible] हरिं भजति [illegible] विशेषं जिमं [illegible] कर्मणि [illegible] कल्पितं तथा
स्यात् [illegible] [illegible] पदः [illegible] लिंगाचतेव [illegible] [illegible] नोदनं पचति गर्गाः शतं
दण्डयति [illegible] [illegible] [illegible] [illegible] इच्छति [illegible] [illegible] फलानि
[illegible] वृक्षं [illegible] शतं जयति देवदत्तम् [illegible] [illegible] [illegible] नातिदेवदत्तं
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] नादि

शतं मुष्णाति ग्राममजां नयति हरति कर्षति वहति वा ॥ अर्पयति वंधनेयं संज्ञा वलिंपि
ततेव समुखो माणवकं धर्मं भाषते ॥ अभिधत्ते वक्तीत्यादि स्तते ॥ कर्त्तेति कर्त्तृसंज्ञा सा
धकतमं करणं क्रियासिद्धौ प्रकृष्टोपकारकं करणं स्यात् कर्तृकरणयोस्तृतीया ॥ अ
नभिहिते कर्त्तरि करणे च तृतीया स्यात् रामेण बाणेन हतो वाली कर्मणा यमभिप्रैति
स संप्रदानं दानस्य कर्मणोद्देश्यः स्यात् चतुर्थी संप्रदाने विप्राय गां ददाति ॥ अनभि
हिते संप्रदाने चतुर्थी विः ॥ नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च ॥ एभिर्योगे चतुर्थी हरये
नमः प्रजाभ्यः स्वस्ति अग्नये स्वाहा पितृभ्यः स्वधा ॥ अलमिति पर्याप्त्यर्थग्रहणं तेन
दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि वषडिंद्राय ॥ ध्रुवमपायेऽपादानं ॥ अपा
यो विश्लेषस्तस्मिन्साध्ये यद्ध्रुवमवधिभूतं तदपादानं ॥ अपादाने पंचमी ग्रामादायाति धा
वतोऽश्वात्पततीत्यादि ॥ षष्ठी शेषे ॥ कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावा ३२

नेनेऽन

बाधत्वेनेह न गर्जे मृजेर्वृद्धिः मार्जरिको वृद्धिः सार्वधातुकार्धधातुकयोः उदित्वा
मार्गः णोऽसं मध्ये णोपधस्य त इति कृत्स्य प्रक्रिया एवं सर्वो धातोरेतोऽस्तः कर्त्तरि
कृदिति कर्त्तर्यर्थे वुवोरनाकौ वुञ्जुणलयोरनुनासिकयोरेतौ स्तः कारकः कर्त्ता नन्दि
प ग्रहिपचादिभ्यो ल्युणिन्यच नन्द्यादेर्ल्युः ग्रहादेर्णिनिः पचादेरच् स्यात् नंदयतीति नंद
नः जनार्दनः लवणः ग्राही स्थायी मंत्रणसपरिभाषमलो मंत्री पचः आकृतिगणो
यं इगुपधज्ञाप्रीकिरः कः क्षिपः बुधः कृशः ज्ञः प्रियः किरः आतश्चोपसर्गे प्रज्ञः सु
हेकः ग्लः गेहे कर्त्तरि गेहे कः गृहं कर्मण्यण् कर्मण्युपपदे धातोरण् कुंभं करोतीति
२ कुंभकारः आतोऽनुपसर्गे कः अलोपवदः गोदः कंबलदः अनुपसर्गे किम् गो
संदायः मूलविभुजादिभ्यः कः मूलानि विभुजतीति मूलविभुजो रथः आकृतिग
णोऽयं महीध्रः कुध्रः वरेस्रः अधिकरणे उपपदे कुरुचरः भिक्षासेनादायेषु

च भिक्षाचरः आदापेति ल्यवं तं आदापचरः कृञो हेतुताच्छील्यानुलोम्येषु ए
ष्वघोसेषु कृञ्टः अतः कृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्य आत
तरस्मान्नमप विसर्गस्य सकारादेशः करोत्यादिषु परेषु यशस्करी विद्या
अ श्रीकरः वचनकरः एजेः खश् एपंतादेजेः खश् अस्मात् अरुर्द्विषदजंतस्य मुम्
अषोद्विषतोऽजंतस्य च मुमागमः स्यिदं तेन त्वव्ययस्य शित्वाच्छवादि एजकेप
नेजनं एजयतीति जनमेजयः प्रियवशे वदः खच् प्रियंवदः अन्येभ्योपि दृश्यं
ते पनिपक्वनिष्ठवनिप्विच् एते प्रत्ययाधातोःस्युः नेड्वशिकृति वशादेः कृत छि
इत्यत्र वहिंसायाम् सुशर्मा प्रातरित्वा विड्वनोरनुनासिकस्यात् अनुनासिक
स्यात्स्यात् छिटवणिच विजायतेइति विजावा ओणृ अपनयने अवावा रुषरि
षहिंसायाम् रोट् रेट् सुगण किप्च अपयपि दृश्यते उरवासत् पर्णध्वस्त ... २१

इष्मदः ॥ सुप्यजातौ णिनिस्ताच्छील्ये ॥ अजात्यर्थे सुप्युपपदे धातोर्णिनिस्ताच्छील्ये द्योत्ये ॥ उ
ष्णभोजी शीतभोजी ॥ मनः ॥ सुपि मन्यतेर्णिनिः स्यात् ॥ दर्शनीयमानी ॥ आत्ममाने खश्च ॥ स्व
कर्मके मनने वर्तमानात् मन्यतेः सुपि खश् णिनिश्च ॥ पण्डितमात्मानं मन्यते पण्डितंम
न्यः पण्डितमानी ॥ खित्यनव्ययस्य ॥ खिदन्ते अनव्ययस्य ह्रस्वः ॥ कालिंमन्या ॥ अव्यय न
वा स्तुदिंमन्या ॥ करणे यजः ॥ करणे उपपदे भूतार्थे यजेर्णिनिः ॥ कर्तरि ॥ सोमेनेष्टवान्
सोमयाजी ॥ दृशेः क्वनिप् ॥ कर्मण्युपपदे भूते पारं दृष्टवान् पारदृश्वा ॥ राजनि यु
नुने धि कृञः क्वनिप् ॥ युधिरंतर्भावितण्यर्थः ॥ राजानं योधितवान् राजयुध्वा राजकृत्वा
सहे च ॥ सहयुध्वा सहकृत्वा ॥ सप्तम्यां जनेर्डः ॥ तत्पुरुषे कृते बहुलं ङेः रलुक् ॥ सरसि
जं सरोजम् ॥ उपसर्गे च संज्ञायां ॥ प्रजा ॥ क्तक्तवतू निष्ठा ॥ एतौ निष्ठासंज्ञौ स्तः ॥ निष्ठा ॥ भू

भूतेऽधिकारोऽयम् ५ वर्तमाने लडिति पावर ५

10

तार्थ्वे हृते धातोर्निष्ठास्यात् तत्र क्तवतोरेवेति भावकर्मणोः क्तः कर्तरि क्तवतुः स्नातं मया स्तु
तस्त्वया विष्णुः विश्वं कृतवान् रदाभ्यां निष्ठातो नः पूर्वस्य च दः रदाभ्यां परस्य निष्ठातस्य
नो निष्ठापेक्षया पूर्वस्य धातोर्दस्य नः पृहिंसायां भिद्विदारणे छिद्द्वैधीकरणे शीर्णः
भिन्नः छिन्नः संयोगादेरातो धातोर्यण्वतः यण्वतः संयोगादेरादन्तान्निष्ठातस्य नः द्राणः
ग्लाणः ल्वादिभ्यः एकविंशतेः ल्वादिभ्यः प्राग्वत् लूनः स्यावयो हनो ज्याप्रहिज्याहलः
ऋग्ग्यवयवाहलः परं यस्य प्रसारणे तदन्तस्यांगस्य दीर्घः जीनः ओदितश्च प्राग्वत्
पूनो कोरिलिशे पुन्नः प्वादितो निष्ठायाम् स्वपते शेदितश्च तिष्ठायामिदान उनो
च्छिलुते हश्चोः मूनः मुपः कः निष्ठातस्य शुषः कः पचोवः पक्वः क्षायो मः क्षामः
यस्य विभाषा यस्य कचिद्विभाषितस्ततो निष्ठायां इडान ग्रहः निष्ठायां सेटि २८

लोपः भावितः भावितवान् दृढः स्थूलबलयोः स्थूले बले च वर्त्तिव दृढ इति निपा
त्यते दधाते र्हि तादौ किति हितम् सोदृढ घोः घुसंज्ञस्य दासंज्ञस्य दद् तादौ किति
च त्वं दत्तं लिटः कानज्वा क्वसुश्च लिटः कानच् क्वसु वास्तः तङानावात्मनेपदम्
चक्राणः न्वोश्च मांतस्य धातोर्नः न्वोः परतः उगागमात् लटः शतृशानचौ वा प्रथमा
समानाधिकरणे अप्रथमांतेन समानाधिकरणे लटः एतौ वास्तः शपादिः पचं
तं चैत्रं पश्य आने मुक् अदंतांगस्य पचमानं पश्य लडित्यनुवर्तमाने पुनर्लट्
ग्रहणात् अप्रथमासमानाधिकरणेपि क्वचित् सन् द्विजः विदेः शतुर्वसुः वेत्ते
परस्य शतुर्वसुरादेशो वा वसेकाजादिघसाम् कृतद्वित्वानामेकाचामादंतानां
घसेश्च वसो रिट् नान्येषाम् विद्वान् विदन् तौ सत् तौ शतृशानचौ सत्संज्ञौ स्तः
लृटः सद्वा करिष्यंतं करिष्यमाणं पश्य आक्वेस्तच्छीलतद्धर्मतत्साधुकारि

12

७ क्विपमपि व्याप्य वस्यमाणेन सर्वो लादि कर्त्तृ जो वो ध्मः तन्कर्त्तृकिदान्
जल्पभिक्षकुट्टलुण्टवृङः षाकन् षः प्रत्ययस्य इत्यप्रत्याहिः षकृत् जल्पाकः
भिक्षाकः कुट्टाकः लुण्टाकः वराकः सनाशंसभिक्ष उः चिकीर्षुः आशंसुः भिक्षुः
भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् भ्राज भासदीप्तौ विभ्राट् भाः धुर्वि हिं
सायाम् राल्लोपः रेफान्तत्वात् यो लोपः कोऽपि लोपदीर्घौ इति धूः विद्युत् ऊर्क् पूः दृशि ग्रहणं
स्यापकर्षणम् अनुवर्तते दीर्घो जुग्रावस्तुवः क्विप् वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्र
सारणं च वक्तीति वाक् पृच्छतीति प्राट् आयतं स्तौति आयतस्तूः कटं प्रवते कटप्रूः जु
रुत्वः श्रयति हरिं श्रीः दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे दावादेष्ट्र
न् करणेऽर्थे दाम्यनेन दात्रं नेत्रम् तितुत्रतथसिसुसरकसेषु च एषां दशानां कृत्प्रत्ययानाम् इण्न शस्त्रं २९
योत्रम् योक्त्रं स्तोत्रम् तोत्त्रं सेत्रम् सेक्त्रम् मेढ्रम् पत्त्रम् दंष्ट्रम् नध्री अर्ति लूधूसूखनसहचर इत्रः

लेत्रम

गतौ रधुगमियमां छः एषां छः शिति गच्छति जगाम गमहनजनखनघसां लोपः क्ङित्य
नङि । उपधाया लोपो जातो क्ङिति नत्वङि । जग्मतुः जग्मुः जगमिथ जगंथ जग्मथुः जग्म
जगाम जगम जग्मिव जग्मिम गंता गमेरिट् परस्मैपदेषु गमेः सादेरर्धधातुके सेट् परस्मै
पदेषु गमिष्यति गच्छतु अगच्छत् गच्छेत् गम्यात् पुषादिद्युताद्य्लृदितः परस्मैपदेषु स्य
न्विकरणे पुषादेर्द्युतादेर्लृदितश्च परस्मैलुङि परस्मैपदेषु अगमत् अगमिष्यत् इति पर
स्मैपदप्रक्रिया एध वृद्धौ टित आत्मनेपदानां टेरे । टितो लस्यात्मनेपदानां टेरेत्वं एधते सा
र्वधातुकं ङित्वत्स्यात् आतो ङितः अतः परस्य ङितामाकारस्य इय् एधेते एधंते थासः से टि
तो लस्य एधसे एधेथे एधध्वे अतो गुणे एधे एधावहे एधामहे इजादेश्च गुरुमतोनृच्छः इजा
देर्धातोर्गुरुमतः ऋच्छस्यान्यस्य ततः आम् लिटि आम्प्रत्ययवत्कृञोनुप्रयोगस्य आमः कृ
स्मात्तुल्यमनुप्रयुज्यमानात्कृञो प्यात्मनेपदं लिटस्तझयोरेशिरेच् लिडादेशयोस्तझयोरेशि

रेचौ ऌ: एधांचक्रे एधांचक्राते एधांचक्रिरे एधांचकृषे एधांचक्राथे इणः षीध्वं लुङ् लिटां धोऽङ्गात्
इणं तादङ्गात्परेषां षीध्वं लुङ् लिटां धस्य ढः एधांचकृढ्वे एधांचक्रे एधांचकृवहे एधांचकृमहे ए
धांबभूव एधामास एकार्थ्याद्वारणं ज्ञापकं तडादेशानां टेरत्वं नेतिस्तेनडीरोरसात् एधिता एधि
तारौ एधितारः एधितासे एधितासाथे धि च धादौ प्रत्यये सलोपः एधिताध्वे ह एति ता
सस्तोः सः एधिताहे एधितास्वहे एधितास्महे एधिष्यते एधिष्ये एधिष्यावहे एधिष्या
महे आमेतः लोट् एतः आम् एधतां एधेतां एधंतां सवाभ्यां वामौ सवाभ्यां परस्य लोडेतः
क्रमाद्वामौ स्तः एधस्व एधेथां एधध्वं एत ऐ लोडुत्तमस्य एधै एधावहै एधामहै आटश्च
ऐधत ऐधेतां ऐधंत ऐधथाः ऐधेथां ऐधध्वं ऐधे ऐधावहि ऐधामहि लिङः सीयुट्
लिङः सलोपः इति सलोपः लोपो व्योर्वलि इति यलोपः एधेत एधेयातां झस्य रन् लिङः ए
धेरन् एधेथाः एधेयाथां एधेध्वं इटोऽत् लिङादेशस्य एधेय एधेवहि एधेमहि सु

ढ्या: लिङ् स्वचोमुटपलोप: एधिषीष्ट एधिषीयास्तां एधिषीरन् एधिषीष्ठा: एधिषीयास्थां
एधिषीढ्वं एधिषीय एधिषीवहि एधिषीमहि ऐधिष्ट ऐधिषातां आत्मनेपदेष्वनत: अ
नकारान्तस्यात्मनेपदेषु कस्मात्स्मात् ऐधिषत ऐधिष्ठा: ऐधिषाथां धिच ऐधिढ्वं ऐधि
षि ऐधिष्वहि ऐधिष्महि ऐधिष्यत ऐधिष्येतां ऐधिष्यंत ऐधिष्यथा: ऐधिष्येथां ऐधिष्य
ध्वं ऐधिष्ये ऐधिष्यावहि ऐधिष्यामहि कमु कान्तौ कमेर्णिङ् स्वार्थे कामयते आयादयो
ल्लोपोवेत्ति [illegible] वर्त्तमाने लोपस्यापवाद: आय अंतु आलु आय्य इत्नु इष्णुच एधिल
रय कामयांचक्रे आयादय इतिवा चकमे चकमाते चकमिरे चकमिषे चकमाथे चकमि
ध्वे चकमे चकमिव हे चकमिमहे कामयिता कामयिता सेकमिता कामयिष्यते कमि
ष्यते कामयतां अकामयत कामयेत कामयिषीष्ट कमिषीष्ट णिश्रिद्रुस्रुभ्य: कर्त्तरि
चङ् एवं तान्त्र श्यादिभ्यश्च [illegible] कत्रर्थे लुङि कमि अतइतिस्थिते णेरनिटि अनिट

दावर्द्धातु के णेर्लोपः णौ च स्मुपधाया ह्रस्वः चङ् परे णौ परे ङ्गे तस्योपधाया ह्रस्वः चङि अ
नभ्यास धातु व य व स्यैकाच्वः प्रथमस्य द्वे स्तो जा ईर्हितीयस्य सवर्ण् लुङि णिचङ् परे नग्लोपे
चङ् परे णौ परे ङ्गे तस्य योभ्या सो लघु परस्तस्य सन्निव कार्यं स्यात् ग्लो व नग्लोपे सति सन्वत्:
अभ्यासस्यात इत्सनि दीर्घो लघोः लघोरभ्यासस्य दीर्घः सत लनावविषये अचीकमत
लिङ् भावपक्षे कमेश्च्लेश्चङ् वाच्यः णेरभावान्न दीर्घसन्वद्भावौ अचकमत अकमयिष्य
त अकमयिष्यत अयगतौ अयते तेप्राग्धातोः उपसर्गस्यायतौ अयतौ उपसर्गस्य रे
फस्य लत्वं प्लायते पलायते दयायासश्च एभ्यः आम् लिटि अयांचक्रे अयिता अयि
ष्यते अयतां आयत अयेत अयिषीष्ट विभाषेटः इणः परोयः इट ततः परेषां षीध्वं
लुङ्लिटां धस्य वा ढः अयिषीध्वं अयिषीढ्वं आयिष्ट आयिढ्वं आयिध्वं आयिष्यत
द्युत दीप्तौ द्योतते द्युतिस्वाप्योः संप्रसारणं अभ्यासस्य संप्रसारणौऽस्य दिद्युते द्योतिता

घोतिष्यते घोतितां अघोतत घोतेत घोतिषीष्ट घुभ्यो लुङि. घुता दिभ्यः परस्मै पदं वा
लुङि. पुषा दीत्वात्. अघुतत अघोतिष्ट अघोतिष्यत एवं जिष्विदा वर्णेजिष्विदा स्नेहने
त्रिष्विदा मोचने इत्ययो: मोहनयो इत्येके जिष्विदा इत्येके मक्षुशब्द रुस्ता यां प्रश्नवणे इत्ये
क्रे त्वदा सावलिप्रीतौ च शुभ शुभ दीप्तौ क्षुभ संचलने णभ तुभ हिंसायां संसु भ्रंसु
ध्वंसु अवस्त्रंसने ध्वंसु गतौ च संभु विश्वासे वृतु वर्तने वर्तते ववृते वर्त्तिता वृद्भ्यः स्यस
नोः वृता दिभ्यः पंचभ्यो वा परस्मै पदं स्यात् सनि च न वृदभ्यश्चतुर्भ्यः वृत वृध शृधु स्यंद्भ्यः
सादेराधे धातुक स्येण न तङानयो रभावे वर्त्स्यति वर्तिष्यते वर्तताम् अवर्तत वर्तेत वर्ति
षीष्ट अवृतत् अवर्तिष्ट अवर्त्स्यत अवर्तिष्यत दददाने ददते न शसदद वादि गु
णानां शसे ददे वकारादीनां गुण शब्दे न विहितस्य एत्वाभ्यास लोपो न दददे द
ददाते दददिरे ददिता ददिष्यते ददतां अददत ददेत ददिषीष्ट अददिष्ट अददि
दे

पते त्रपूष् लज्जायां त्रपते ते. फलभजत्रपश्च एत्वाभ्यासलोपश्च क्विति लिटि सेटि थलि
च त्रेपे त्रपिता त्रप्ता त्रपिष्यते त्रप्स्यते त्रपतां अत्रपत त्रपेत त्रप्सीष्ट त्रपिषीष्ट अत्रपत अत्र
पिष्ट अत्रप्त अत्रपिष्यत अत्रप्स्यत ॥ इत्यात्मनेपदप्रक्रिया ॥ श्रिञ् सेवायां श्रयति
श्रयते शिश्राय शिश्रिये श्रयितासि श्रयितासे श्रयिष्यति श्रयिष्यते श्रयेत श्रयतां अश्रयत् श्र
येत् श्रयेत श्रीयात् श्रयिषीष्ट चङि. अशिश्रियत् अशिश्रियत अश्रयिष्यत् अश्रयिष्यत भृ
ञ् भरणे भरति भरते बभार बभ्रतुः बभ्रुः बभर्थ बभृव बभृम बभृव बभ्रे भर्तासि भर्तासे रिङ् शयग्लि
ङ्. वृक्ते रिङ्. ध्रिसामर्थ्यात् दीर्घो न भ्रियात् उश्च झलादी लिङ् सिचौ किती स्तस्तङि. भृषीष्ट
भृषीयास्तां अभार्षीत् ह्रस्वादंगात् सिचो लोपः झलि अभृत अभरिष्यत् अभरिष्यत ॥ हृञ् हरणे
हरति हरते जहार जहर्थ जह्रिव जह्रे जह्रिषे हर्ता हरिष्यति धृञ् धारणे धरति धरते णीञ् प्रापणे
नयति नयते डुपचष् पाके पचति पचते पपाच पेचिथ पपक्थ पेचे पक्ता भज सेवायां भजति भजते

वि

द्व कि बार्थे लिङि रि३.।। ३

१९

येजे यष्टा यक्ष्यति यक्ष्यते अयाक्षीत् अयष्ट अयक्षातां यज देवपूजासंगतिकरणदानेषु यजति
यजते लिङ्यप्रसंयोगे यः वच्यादीनां ग्रह्यादीनां चास्य सस्य संप्रसारणं लिटि इयाज वचिस्वपियजादी
नां किति वचिस्वपियजादीनां च संप्रसारणं किति यजिर्वपिर्वहिश्चैव वसिर्वेञ्व्येञ् ह्वेञ् वदी श्वयति
श्चैव यजाद्याः स्मृता इजेव ईजतुः ईजुः इयजिथ इयष्ठ ईजे यष्टा षढोः कः सि यक्ष्यति यक्ष्यते इज्यात् यक्षी
ष्ट अयाक्षीत् अयष्ट वह प्रापणे वहति वहते उवाह ऊहतुः ऊहुः उवहिथ ऊ[illegible]धोधः झषः परयो
स्तथयोर्धः स्यात् न तु दधाते ढो ढे लोपः सहिवहोरोदवर्णस्य ढलोपे उवोढ ऊहे वोढा वक्ष्यति अवाक्षीत् अ
वोढां अवाक्षुः अवाक्षीः अवोढं अवोढ अवाक्षं अवाक्ष्व अवाक्ष्म अवोढ अवक्षातां
अवक्षत अवोढाः अवक्षाथां अवोढ्वं अवक्षि अवक्ष्वहि अवक्ष्महि इति भ्वादिः अद भक्षणे
अदिप्रभृतिभ्यः शपः लुक् स्यात् अत्ति अत्तः अदंति अत्सि अत्थः अत्थ अद्मि अद्वः अद्मः
लिट्यन्यतरस्यां अदो घस्लृ वा स्यात् लिटि जघास गमहनेति उपधालोपः घस्य चर्त्वं शासिवसिघसी

नोच इणत्रुभ्यां चेक्षांचस्मरणः जक्षतुः जक्षुः जघसिथ आद आदतुः इडत्यर्तिव्ययतीनां अदृ अत्ये त
राध्वसप्यलोनित्यमिट आदिथ अत्ता अत्स्यति अत्तु अत्तात् अत्तां अदंतु हुझल्भ्योहेर्धिः अ
द्धि अत्तात् अत्तं अत्त अदानि अदाव अदाम अदः सर्वेषां अदोऽस्तः स्य सार्वधातुकस्य अ
दस्मात् आदत् आत्तां आदन् आदः आत्तं आत्त आदं आद्व आद्म अघात् अघाता अघा
तं अघासां अघासुः अघाः अघास्तं अघास्त लुङ्सनोर्घसॢ अदः अदः अघसत् आत्स्यत्
हन हिंसागत्योः हंति अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति अनुनासिकं
तानामेषां लोपः यमिरमिनमिगमिहनिमनवनतितनोत्यनुदात्तोपदेशाः तनुक्षणुक्षिणु ऋणु तृणु ऋणु
तृणु घृणु वनु मनु तनोत्यादयः हतः घ्नंति हंसि हथः हथ हन्मि हन्वः हन्मः जघान जघ्नतुः जघ्नुः अभ्या
सच्चेर्वर्तेर्हस्य कुत्वं जघनिथ जघंथ जघ्नथुः जघ्न जघान जघन जघ्निव जघ्निम हंता ऋद्धनोः स्ये ह २
निष्यति हंतु हतात् हतां घ्नंतु हंतेर्जः हौ असिद्धवदत्राभा त इत ऊर्द्ध्वमापादपरिसमाप्ते राभीयं

हते

समानाशयेनस्मिन्न कर्त्तव्ये तदसिद्धं इति जस्याभ्यासिद्धत्वान्न हेर्लुक् जहि हन्तात् हन्तं हत हनानि हनाव
हनाम अहन् अहतां अघ्नन् अहं अहन अहतं अहत अहनं अहन्व अहन्म हन्यात् आर्द्धधा
तुके हन्तेर्वधः हनो वध लिङि लुङि च वध्यात् वध्यास्तां अवधीत् अहनिष्यत् युमिश्रणे
यौः उतो वृद्धिर्लुकि हलि लुग्विकरणे उतो वृद्धिः पिति हलादौ सार्वधातुके न त्वभ्यस्तस्य यौति युतः युवं
ति यौषि युथः युथयौमि युवः युमः युयाव युयविथ यौतु युतात् अयौत् अयुतां अयु
वन् युयात् ह्रस्व दृढिनेभ्यश्च पित्वद्यङि नजि च द्विपिन्नोति ख्याख्यानात् युयातां युयुः यूयात् यूयास्तां
यूयासुः अयावीत् अयविष्यत् या प्रापणे याति यातः यान्ति यासि यासि याति यासि याथ यातु अया
त् अयातां लङः शाकटायनस्यैव आदन्तात् लङो जुस् वा अयुः अयान् यायात् यायातां यायुः
यायात् यायास्तां यायासुः अयासीत् अयासिष्टां अयासिषुः अयासीः अयासिष्टं अयासि
ष्ट अयासिषं अयासिष्व अयासिष्म अयास्यत् एवं वा गतिगन्धनयोः भादीप्तौ ष्णा शौचे श्रा
पाके द्रा कुत्सायां गतौ च प्सा भक्षणे लौ रा दाने ला आदाने दाप् लवने ख्या प्रकथने अपेसा वर्षा

पाद्वतीति

तुकएवप्रयोक्तव्यः विद्‌ज्ञाने विदोलटोवा वेत्तेर्लटः परस्मैपदानां णलादयोवावेद विदतुः वि
दुः वेत्थ विदथुः विद वेद विद्व: विद्म वेत्थ वेद्‌कुपदे वेत्ति वित्तः विदंति उषविद जागृभ्यो
न्यतरस्यां एभ्योलिट्याम्वा विदेरद्वेतत्वप्रति ज्ञानार्थकाविनाणः विदांचकार विवेद वेदिता वेदिष्यति
विदांकुर्वंत्वित्यन्यतरस्यां वेत्तेर्लोट्याम् गुणाभावो लोटोलुक् लोटंतकरोत्यनु प्रयोगश्च वाविधास्य
ते इतिशब्दात् चरूपवचनेनेह विवक्षते तस्मादिह जस्मः उः शपोपवादः विदांकरोतु अतउ
त्सार्वधातुके उप्रत्ययांतस्य कृञोतउत्सार्वधातुके क्ङिति विदांकुरुतात् विदांकुरुतां विदांकुर्वं हता
तुः विदांकुरु विदांकरवाणि विदांकरवाव विदांकरवाम पक्षे वेत्तु वित्तात् वित्तां विदंतु विद्धि
वित्तं वित्त वेदानि वेदाव वेदाम अवेत् अवित्तां अविदुः दश्च धातोर्दस्यपदांतस्य सिपिरुर्वा
अवेः अवेत् विद्यात् विद्यातां विद्याता अवेदीत् अवेदिष्यत् अथ उचि अस्ति उपसर्गेण प्रा
दुर्भावेपरस्मैपदेप्राप्तेः उपसर्गेणः प्राडुसश्च परस्माकः सपञ्चः वकारेचिविपरे निष्ठानः प्राडः स्या
त् निर्पतेतिप्राडः पवतिपञ्चाः किं अपित्व श्नसोरल्लोपः श्नसमास्त श्नातोलोपः सार्वधातुके १२

क्ङिति स्तः संति अस्ति स्थः स्थ अस्मि स्वः स्मः अस्तेर्भूः आर्द्धधातुके बभूव भविता भविष्यति
अस्तु स्तात् स्तां संतु घ्वसोरेद्धावभ्यास लोपश्च घोरेत्वे त्वं हु व भ्यास लोपश्च आभीयत्वात् हेर्धिः
एधि स्तात् स्तं स्त असानि असाव असाम आसीत् आस्तां आसन् स्यात् स्यातां स्युः भूयात्
अभूत् अभविष्यत् इण गतौ एति इतः इणो यणि अजादौ प्रत्यये परे ति अभ्यासस्यासवर्णे इउवर्णयो
रियुवौ इयेष इयाय दीर्घ इणः किति इणोभ्यासस्य दीर्घः किति लिटि ईयतुः ईयुः इययिथ इ
येथ ऐत् ऐतां आयन् इयात् ईयात् एते लिङि उपसर्गात्परस्य इणोकोह्रस्वः स्याद्रुद्धातुके किति लि
टि त्रियात् अंतादिवच्च एकोप्येकादेशः पूर्वस्यांतवत्स्यात्परस्यादिवत्स्यात् उभयत आम्नये [illegible] तां तारि
[illegible] स्येप सेत्स्येसेतां आयन् [illegible] अभीयात् अणः किंसमेयात् इणोगा लुङि गातिस्थेति सिचो
लुक् अगात् अगातां अगुः ऐष्यत् शीङ् स्वप्ने शीङः सार्वधातुके गुणः शेते शयाते शेरते शीङः
सकसातोह टैशरते शेषे शयाथे शेध्वे शये शेवहे शेमहे शिश्ये शिश्याते शिश्यिरे शयिता शयिष्यते
शेतां शयातां शेरतां अशेत अशयातां अशेरत शयीत शयीयातां शयीरन् एधि षीष्ट अशयिष्ट

अधीयाथां अधीध्वं अधीये अधीवहि अधीमहि अधीयीत ३ 24

अथ विध्यत इङ् अध्ययने इङिकावध्युपसर्गतो न व्यभिचरतः अधीते अधीयाते गाङ् लिटि इङः
अधिजगे अध्येता अध्येष्यते अधीतां अधीयातां अधीयतां अधीष्व अधीयाथां अधीध्वं अ
ध्ययै अध्ययावहै अध्ययामहै अध्यैत अध्यैयातां अध्यैयत अध्यैथाः अधीयीयातां अधीयी
इङ् रन् अध्येषीष्ट विभाषा लुङ्लृङोः गाङ् गाङ् कुटादिभ्यो ञ्णिन्ङित् गाङादेशः कुटादिभ्यश्च ञ्णितो ङितः प्रत्य
यादिति ङित्स्यः घुमास्थागापाजहातिसां हलि एषामात ईत्स्यात् हलादौ क्ङिति सार्वधातुके अध्यगीष्ट अध्यैष्ट
अध्यगीष्यत अध्यैष्यत दुह प्रपूरणे दोग्धि दुग्धः दुहंति धोक्षि दुग्धे दुहाते दुहते धुक्षे दुहाथे धुग्ध्वे
हे दुहे दुह्वहे दोग्धा धोक्ष्यति धोक्ष्यते दोग्धु दुग्धात् दुग्धां दुहंतु दुग्धि दुग्धात् दुग्धं दुग्ध दोहानि दुग्धां
दुहातां दुहतां धुक्ष्व दुहाथां धुग्ध्वं दोहै दोहावहै दोहामहै अधोक् अदुग्धां अदुहन् अदोहं अदु
ग्ध अदुहातां अदुहत अधुग्ध्वं दुह्यात् दुहीत लिङ् सिचावात्मनेपदेषु इक्तमोपधाद्धलः परौ झलादि
लिङ्सिचावात्मनेपदपरः किद्वैस्तौ कित्तौ स्तः धुक्षीष्ट शल इगुपधादनिटः क्सः इगुपधोयः शलंतस्तस्माद १२
निटश्च्लेः क्सादेशः अधुक्षत लुग्वा दुहदिहलिहगुहामात्मनेपदे दंत्ये एषां क्सस्य लुग्वा दन्त्ये तङि अधु

दुदोह दुदुहे

ह्वत अदुग्ध क्सस्याचि अजादौ तङि. क्सस्य लोपः अधुक्षातां अधुक्षत अदुग्धाः अधुक्ष-
थाः अधुक्षाथां अधुग्ध्वं अधुक्षध्वं अधुक्षि अधुक्षावहि अधुक्षामहि अधोक्ष्यत अधोक्ष्य-
त एवं दिह उपचये लिह आस्वादने लेढि लीढः लिहंति लेक्षि लीढ लिहाते लिहते लिक्षे लिह्वे
लीढ्वे लेढु लीढात् लीढां लिहंतु लीढि लेहानि लीढां अलेट् अलीढ अलिक्षत् अलिक्षत
अलीढ ब्रूञ् व्यक्तायां वाचि ब्रुवः पंचानामादित आहो ब्रुवः ब्रुवो लटस्तिबादीनां पंचानां णलादयः
पंच वास्युः ब्रुवश्चाहादेशः आह आहतुः आहुः आहत्थ आहथुः झलि चर्त्वं आत्थ आहथुः ब्रुवई-
ट् ब्रुवो हलादेः पित ईट् ब्रवीति ब्रूतः ब्रुवंति ब्रुवो वचिः आर्द्धधातुके उवाच ऊचतुः ऊचुः उवचि-
थ उवक्थ ऊचे वक्ता वक्ष्यति ब्रवीतु ब्रूतात् ब्रूतां ब्रुवंतु ब्रूहि ब्रवाणि ब्रूतां ब्रुवातां अब्रवीत्
अब्रूत ब्रूयात् ब्रुवीत उच्यात् वक्षीष्ट अस्यति वक्ति ख्यातिभ्योऽङ् वच उम् अङि अवोचत्
अवोचतां अवोचत अवक्ष्यत् चर्करीतं च चर्करीतमिति यङ्लुगंतं तददादौ बोध्यं ऊर्णुञ् आ-
च्छादने ऊर्णोतेर्विभाषा वृद्धिर्हलादौ पिति सार्वधातुके ऊर्णौति ऊर्णोति ऊर्णुतः ऊर्णुवंति ऊर्णुते ऊर्णु-
वाते ऊर्णुवते ऊर्णोति एणोति वाच्यं नन्द्राः संयोगादयः अचः पराः संयोगादयो नद्राः छन्दसिवं

ब्रूते ब्रुव
ब्रुवते

एभ्यः

ऊ.

ति गुणवृद्धिस्थले ऊर्णुनाव ऊर्णुनुवतुः ऊर्णुनुवुः विभाषोर्णोः इडादिप्रत्ययो ङिद्वा स्यात् ऊर्णुनुवि
थ ऊर्णुनविथ ऊर्णुनुवे ऊर्णुनुवाते ऊर्णुविता ऊर्णविता ऊर्णविष्यति ऊर्णौतु ऊर्णोतु ऊर्णवा
नि ऊर्णवै गुणोऽपृक्ते ऊर्णोतेर्गुणोऽपृक्ते हलादौ पिति सार्वधातुके और्णोत् और्णोः ऊर्णुयात्
ऊर्णवीत् ऊर्णूयात् ऊर्णूयास्तां ऊर्णविषीष्ट ऊर्णुविषीष्ट ऊर्णोतेर्विभाषा इडादौ परस्मैपदे ऽस्ति
गुविष्यत चि वृद्धिः पक्षे गुणः और्णावीत् और्णाविष्टां और्णवीत् और्णविष्टां और्णुवीत् और्णुवि
और्णुविष्यत् और्णविष्यत् और्णुविष्यत् इत्यदादिः अथ जुहोत्यादयः जुहोत्यादिभ्यः श्लुः श
पः श्लौ धातोर्द्वे स्तः जुहोति जुहुतः अदभ्यस्तात् झस्य अत् हुश्नुवोरिति यण् जुह्वति भीह्रीभृहुवां श्लु
वच्च एभ्यो लिटि आम्वा स्यादामि श्लाविव कार्यं च जुहवाञ्चकार जुहाव होता होष्यति जुहोतु जुहुतात्
जुहुतां जुह्वतु जुहुधि जुहवानि अजुहोत् अजुहुतां जुसि च इगन्तांगस्य गुणोऽजादौ जुसि अजुह
वुः जुहुयात् हूयात् अहौषीत् अहोष्यत् ञिभी भये बिभेति भियोऽन्यतरस्यां इकारो वा स्याद्धलादौ
क्ङिति सार्वधातुके बिभीतः बिभितः बिभ्यति बिभयाञ्चकार बिभाय भेता भेष्यति बिभेतु बिभितात् २४
बिभीतात् अबिभेत् बिभियात् भीयात् अभैषीत् अभेष्यत् ह्री लज्जायां जिह्रेति जिह्रीतः

षः ६

जिह्रियति जिह्रयांचकार जिह्राय ह्रेता ह्रेष्यति जिह्रेतु अजिह्रेत् जिह्रीयात् ह्रीयात् अह्रै
षीत् अह्रेष्यत् पृ पालनपूरणयोः अर्तिपिपर्त्योश्च अभ्यासस्य इत्वं लोपि वर्ति उदोष्ठ्यपूर्वस्य अंग
वयवोष्ठ्यपूर्वो यः ऋत् तदन्तस्यांगस्य उः हलि च रेफवान्तस्य धातोरुपधाया इको दीर्घो हलि पिपूर्तः पिपुर
ति पपार शृदृप्रां ह्रस्वो वा किति लिटि पप्रतुः पपुः ऋच्छत्यॄतां लोटादिक ऋच्छते ऋतां गु
णो लिटि पपरतुः पपरुः वृतो वा वृङ्वृञ्भ्यामॄदन्ताच्चेटो दीर्घो वा स्यान्नतु लिटि परिता परीता
परिष्यति परीष्यति पिपर्तु अपिपः अपिपूर्तां अपिपरुः पिपूर्यात् पूर्यात् अपारीत् सि
चि वृद्धिः परस्मैपदेषु अत्र इटो न दीर्घः अपारिष्टां अपरिष्यत् अपरीष्यत् ओहाक् त्यागे
जहाति जहातेश्च इ वा स्याद्धलादौ क्ङिति सार्वधातुके जहितः ई हल्यघोः श्नाभ्यस्तयोरातः इत्वं सा
घोः र्वधातुके क्ङिति हलि जहीतः श्नाभ्यस्तयोरातो लोपः क्ङिति सार्वधातुके जहति जहौ हाता हा
स्यति जहातु जहितात् जहीतात् आ च हौ जहातेश्च आदिरीतो जहाहि जहिहि जहीहि अजहात् अ
जहुः लोपो यि जहातेरातो लोपो यादौ सार्वधातुके जह्यात् हेयात् अहासीत् अहास्यत् मा

28

ङ्. माने शब्दे च मजानिते मजमाङ्. ओ हाङ्. एषां मध्यमासस्येत्यस्यार्थे मिमीते मिमाते मिमते ममे
माता मास्यते मिमीतां अमिमीत मिमीत मासीष्ट अमास्त अमास्यत ओ हाङ् गतौ जिहीते
जिहते जहे हाता हास्यते जिहीतां अजिहीत जिहीत हासीष्ट अहास्त अहास्यत डु भृञ् धारण
पोषणयोः बिभर्ति बिभृतः बिभ्रति बिभृते बिभ्राते बिभ्रते बिभरांचकार बभार बभर्थ ब
भृव बिभरांचक्रे बभ्रे भर्ता भर्तासि भर्तासे भरिष्यति भरिष्यते बिभर्तु बिभराणि बिभृतां
अबिभः अबिभृतां अबिभरुः अबिभृत बिभृयात् बिभ्रीत भ्रियात् भृषीष्ट अभार्षी
त् अभृत अभरिष्यत् अभरिष्यत डु दाञ् दाने ददाति दत्तः ददति दत्ते ददाते ददते
ददौ ददे दाता दास्यति दास्यते ददातु दाधाघ्वदाप् दाप् सा ह्लस्य धाः पाघ्रा ध्मा घुसंज्ञा स्वर्
पदे घोविना घसोरिद्वेत्वं देहि दत्ता अददात् अदत्त दद्यात् ददीत देयात् दासीष्ट अदा
त् अदाता अदुः स्थाघ्वोरिच्च अनयोरिदंतादेशः सिच्च किदात्मनेपदेषु अदित अदास्य
त् अदास्यत डु धाञ् धारणपोषणयोः दधाति दधस्तथोश्च झलन्तस्य भषः तस्य धाञो २५

वृश्चौ प्रघतण्ययोः स्थोप्र्वपरतः धत्तः दधति दधासि धत्स्थः धत्ते धत्से धत्स्वेदधात धेहि
लि जिरशौचपोषणयोः इरश्नुत्से स्पात्वभ्यासे निजां त्रयाणां गुणः श्लौ निज विज विषाम स्याभ्यास
गुणः स्याच्छ्रौ नेनेक्ति नेनिक्तः नेनिजति नेनिक्षे नेनिजाते नेनिजते नेनिजे नेनिज्वे नेक्ला
नेदमते नेनेक्तु नेनिग्धि नाम्यन्तस्या विधिति सार्वधातुके लघुपरगले नेनिजानि नेनिक्तां
अनेनेक् अनेनेक्त अनेनिक्तां अनेनिजे अनेनिक्थ नेनिज्यात् नेनिजीत निज्यात् निज्ञीष्ट
इत्ते वा इति तो धातो क्रूरकृत्वा परस्मैपदेषु अनिजन्त् अनेनीत अनिक्त अनेक्षत अने
क्षत इति जुहोत्यादि दिवु क्रीडा विजिगीषा व्यवहार द्युति स्तुति मोद मद स्व म कान्ति गतिषु दिवादि
भ्यः श्यन् कर्त्तरि सार्वधातुके शपोऽपवादः हलि चेति दीर्घः दीव्यति दिदेव देविता देविष्यति दी
व्यतु अदीव्यत् दीव्येत् दीव्यात् अदेवीत् अदेविष्यत् एवं षिवु तंतुसन्ताने नृती गात्रविक्षे
पे नृत्यति ननर्त्त नर्त्तिता से सिचि कृतचृतछृदतृदनृतः एभ्यः सिज्भिन्नस्य सादेरार्धधातुक
अ स्येड्वा नर्त्तिष्यति नृत्यात् नर्त्तीत् त्रसी उद्वेगे वा भ्राशेति श्यन्वा त्रस्यति त्रसति तत्रास वा जृभ्रमु
त्रसां एषां किति लिटि सेटि थलि च एत्वाभ्यासलोपौ वा त्रेसतुः तत्रसतुः त्रेसिथ तत्रसिथ त्र

30

सिता अत्रासीत् अत्रसीत् शोतनूकरणे ओतः श्यनि लोपः श्यति श्यतः शशौ शशौ शशतुः
शशुः शाता शास्यति विभाषा घ्राधेट्शाच्छासः एभ्यः सिचो लुग्वा परस्मैपदेषु अशात् अशातां
अशुः इट्सकौ अशासीत् अशासिष्टां छो छेदने छ्यति चंत कर्मणि स्यति ससौ दो अवखंडे
ने द्यति ददौ देयात् अदात् अदूतां [illegible] हि ष्मा न पिबन्ति वा [illegible] तिट प्रतिट छति
मज्जती नंक्षिति च एषां संप्रसारणं स्यात् किङिति व्यध् विध्यति विव्याध विविधतुः विव्यधिथ विव्या
द्धव्यद्ध व्यत्स्यति विध्येत् विध्यात् अव्यात्सीत् अव्यात्तां पुष पुष्टो पुष्यति पुपोष पुपोषि
थ पोष्टा पोक्ष्यति पुषादि द्युतादि अपुषत् शुष शोषणे शुष्यति शुशोष अशुषत् णश अ
दर्शने नश्यति ननाश नेशतुः रधादिभ्यश्च रधिनशि ... [illegible] एभ्यो वला
घोष्ठ धातुकस्य वेट् नेशिथ मस्जिनशोर्झलि नुम् ननंष्ठ नेशिव नेशिम नशिता नंष्टा नशिष्य
ति नंक्ष्यति नश्येत् नश्यात् अनशत् षूङ् प्राणिप्रसवे सूयते सुषुवे [illegible] इति [illegible] एका
च उगंतः [illegible] कित् इत्यन [illegible] नियमात् इट् सुषुविवहे सोता सविता असविष्ट असोष्ट दूङ् प १६
रितापे दूयते अदविष्ट दीङ् क्षये दीयते दीङो युडचि क्ङिति दीङः परस्माज्जादेः क्ङिति आर्द्धधा

तुकस्पष्ट तुम्पुटा तुतुवस्तुलो स्निष्टौ वेस्तक्यो दिदीपे मीनाति मिनोति दुद्धां सपिप्र एकामालो सपिवा
दृश्यिले जिल्पिते दातादास्यते अदास्त जीङ् विहायसा गतौ जीयते दीङ् क्षाने दीयते माङ् माने माय
ते ममे जनी प्रादुर्भावे जायते जज्ञे जनिता जनिष्यते दीप जनबुधपूरितायिप्या
यिप्यास्म तरसं एरम्भेच्छिरिटच्छवचने तशब्दे परे चिणा लुक् चिणः परस्य तलुक् जनिवध्यो
श्च अनयोर्नेटि चिण्कृति जिति किति चिकृति च अजनि अजनिष्ट दीपादीसो दीप्यते दिदीपे
अदीपि अदीपिष्ट पद गतौ पद्यते पेदे पत्ता पत्सीष्ट चिण्ते पदः पदश्चिण्लोपे परे अ
पादि अपत्सातां अपत्सत विद सत्तायां विद्यते वेत्ता बुध अवगमने बुध्यते बोद्धा भोत्स्य
ते भुत्सीष्ट अबोधि अबुद्ध अभुत्सातां बुधसंप्रहारे बुध्यते बुबुधे योद्धा अयुद्ध सृज वि
सर्गे सृज्यते ससृजे ससृजिषे सृजिदृशोर्झल्यमकिति अनयोरमकित्यादावकिति स्रष्टास्र
क्ष्यते सृक्षीष्ट असृष्ट असृक्षातां मृष तितिक्षायां मृष्यति मृष्यते ममर्ष ममृषे ममर्षि
थ ममृषे ममृषिषे मर्षितासि मर्षितासे मर्षिष्यति मर्षिष्यते णह बन्धने नह्यति नना

ह ननह नेहे नहा नत्स्यति अनात्सीत् अनद्ध इति दिवादिः ॥ षुञ् अभिषवे स्वादि
भ्यः श्नुः श्नुः शपोपवादः सुनोति सुनुतः हुश्नुवोरिति यण् सुन्वंति सुन्वः सुनुवः सुनुते
सुन्वाते सुन्वते सुन्वहे सुनुवहे सुषाव सुषुवे सोता सुनु सुनवानि सुनवै सुनुयात् सूया
स्पः त् स्तुसुधूञ्भ्यः परस्मैपदेषु सिचि इट् असावीत् असोष्ट चिञ् चयने चिनोति चिनुते विभा
षा चेः अभ्यासात् कुत्वं वा स निलिटि च चिकाय चिचाय चिक्ये चिच्ये अचैषीत् अचे
ष्ट स्तृञ् आच्छादने स्तृणोति स्तृणुते शर्पूर्वाः खयः अभ्यासस्य शर्पूर्वाः खयः शिष्यं
ते स्यह लोलुप्यते तस्तार तस्तरतुः तस्तरे गुणोर्तीति गुणः स्तर्यात् ऋतश्च संयोगादेः ऋ
दंतात् संयोगादेर्लिङि सिचोरिडू तङि स्तरिषीष्ट स्तृषीष्ट अस्तरिष्ट अस्तृत धुञ् कंपने धु
नोति धुनुते दुधाव दुधुवे अधौषीत् अधोष्यत धूञ् कंपने धूनोति धूनुते स्वरतीति
वेट् दुधविथ दुधोथ अधोष्ट इति स्वादिः ॥ तुद व्यथने तुदादिभ्यः शः शः शपोपवादः तुद
ति ते तुतोद तुतुदे तोत्ता अतौत्सीत् अतुत्त णुद प्रेरणे नुदति नुदते नुनोद नोत्ता २१
नुद

भ्रस्ज पाके ग्रहिज्यासस्य श्चुत्वेन शः शस्य जश्त्वेन जः भृज्जति भ्रस्जोरोपधयोरमन्यतरस्यां
भ्रस्जो रेफस्योपधायाश्च स्थाने रमागमो वार्धधातुके मित्वादन्त्यादचः परः स्थाने योगत्वनिर्दे
शाद्रेफोपधयोर्निवृत्तिः बभर्ज बभर्जतुः बभर्जिथ बभर्ष्ठ बभ्रज्ज बभ्रज्जतुः बभ्रज्जिथ स्को
रिति सलोपः व्रश्चेति षः बभ्रष्ठ बभर्जे बभ्रज्जे भर्ष्टा भ्रष्टा भर्क्ष्यति क्ङिति रमागमं बाधि
त्वा संप्रसारणं पूर्वविप्रतिषेधेन भृज्ज्यात् भृज्ज्यास्तां भृज्ज्यासुः भर्क्षीष्ट भ्रक्षीष्ट अभा भक्षीष्ट
र्क्षीत् अभ्राक्षीत् अभर्ष्ट अभ्रष्ट कृष विलेखने कृषति कृषते चकर्ष चकृषे अ
नुदात्तस्य चर्दुपधस्यान्यतरस्यां उपदेशेऽनुदात्तो य ऋदुपधस्तस्याम्वा झलादावकिति
क्रष्टा कर्ष्टा कृक्ष्यात् कृक्षीष्ट स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वक्तव्यः अक्राक्षी
त् अकार्क्षीत् अकृक्षत अकृष्ट अकृक्षातां अकृक्षत अकृर्ष्वत मिल संगमे
मिलति मिलते मिमेल मिमिले मेलिता अमेलीत् मुचॢ मोक्षणे मुचादीनां नुम्

मुमूलुश विद् लिश सिच् कृत् खिद् पिश नुम् मुंचति मुंचते मोक्ता मुच्यात् मुक्षीष्ट अमुचत् 34
अमुक्त अमुचाता लुप्ल छेदने लुंपति लुंपते लोप्ता अलुपत् अलुप्त विद्लृ लाभे
विंदति विंदते विवेद विविदे व्याघ्र भूतिमतेसेट् वेदिता माध्यमतेनिट् परिवेत्ता सिच
क्षरणे सिंचति लिपिसिचिह्वश्च एभ्य च्लेरङ् असिचत् आत्मनेपदेष्वतरस्यां लिपि
सिचिह्वः परस्मैपदेषु असिचत असिक्त कॄ विक्षेपे ॠत इद्धातोः किति ङिति स्विपरे कि
रति चकार चकरतुः चकरुः करिता करीता कीर्यात् अकारीत् गॄ निगरणे अचि विभा
षा गिरति रेफस्य लो वा जादौ प्रत्यये गिरति गिलति जगार जगाल जगरिथ जगलिथ ग
रिता गरीता गलिता गलीता प्रछ ज्ञीप्सायां ग्रहिज्या पृच्छति पप्रच्छ पप्रच्छतुः पप्रच्छुः प्र
ष्टा प्रक्ष्यति अप्राक्षीत् मृङ् प्राणत्यागे म्रियतेर्लुङ्लिङोश्च लुङ्लिङोः शितश्च प्रकृतिभूतात्तङ्. १८
स्तङ् तास्त्र रिङ् म्रियते ममार ममर्थ मम्रिव मर्ता मरिष्यति मृषीष्ट अमृत इति तुदादि
२

र 35

रुधिर् आवरणे रुधादिभ्यः श्नम् शपोपवादः इत्संज्ञाभावात् रुणद्धि श्नसोरल्लोपः रुन्द्धः रुन्धं-
ति रुणत्सि रुन्द्धः रुन्द्ध रुणध्मि रुन्ध्वः रुन्ध्मः रुन्द्धे रुन्धाते रुन्धते रुन्द्धि रुणधानि रुणधाव रुन्धातै
रुन्त्स्व रुणधै रुणधावहै अरुणत् अरुणद् अरुन्द्धां अरुन्धन् अरुणः अरुणत् अ-
रुणधं अरुन्द्ध अरुन्द्ध अरुणधं अरुन्ध्व अरुन्ध्म अरुन्द्ध अरुन्धातां अरुन्धत रुध्यात्
रुन्धीत रुध्यात् रुत्सीष्ट अरुधत् अरौत्सीत् अरुद्ध अरौत्साताम् अरौत्सत भिदिर् विदार एवं
णे छिदिर् द्वैधीकरणे उजिर् योगे शिष्लृ विशेषणे शिनष्टि शिंष्टः शिंषन्ति शिनक्षि शिशेष
एवं शिशेषिथ पशिष्टा शेक्ष्यति शिनष्टु शिंढि शिनानि अशिनट् शिंष्यात् शिष्यात् अशि-
षत् अशेक्ष्यत् एवं पिष्लृ संचूर्णने भंजो आमर्दने श्नान्नलोपः भनक्ति बभंजिथ बभंज
भंक्ता भुज पालनाभ्यवहारयोः भुनक्ति भोक्ता भोक्ष्यति अभुनक् जिइन्धी दीप्तौ इन्द्धे इन्धाते इ-
न्धते इन्त्से इन्धांचक्रे इन्धिता इन्त्स्यते इन्धातां इन्धे ऐन्द्ध ऐन्धातां ऐन्धत विद् विचारणे विंत्ते वेत्ता
इति रुधादि तनु विस्तारे तनादिकृञ्भ्य उः शपोपवादः तनोति तनुते ततान तेने त्तनि

36

ता तनुयात् तन्वीत् तन्यात् तनिषीष्ट अतनीत् अतानीत् तनादिभ्यस्तथासोः तनादेः
सिचो वा लुक् तथासोः अतत अतनिष्ट अतथाः अतनिष्ठाः अतनिष्यत् अतनिष्यत
डुकृञ् करणे करोति अत उत्सार्वधातुके कुरुतः नभकुर्छुरां भस्य कुर्छुरोरुपधाया न दीर्घः
कुर्वन्ति नित्यं करोतेः करोतेः प्रत्ययकारस्य नित्यं लोपो म्वोः कुर्वः कुर्मः कुरुते चकार चक
र्थ चकृव चक्रे कर्ता करिष्यति करिष्यते करोतु कुरुतां अकरोत् अकुरुत ये च कृञ उ
लोपो यकारे प्रत्यये कुर्यात् कुर्वीत क्रियात् कृषीष्ट अकार्षीत् अकृत अकरिष्यत् अ
करिष्यत संपरिभ्यां करोतौ भूषणे सम्पर्युपेभ्यः करोतेः सुट् भूषणे समवाये च संस्करोति अलंका
वनु रोतीत्यर्थः संस्कुर्वन्ति संघीभवन्तीत्यर्थः मनु अवबोधने मनुते मेने मनिता मनिष्यते म
याचने नुतां अमनुत मन्वीत मनिषीष्ट अमनिष्ट अमनिष्यत इति तनादिः डुक्रीञ् द्रव्यवि
निमये क्र्यादिभ्यः श्ना श्यपोपवादः क्रीणाति ई हल्यघोः क्रीणीतः श्नाभ्यस्तयोरातः क्री १९
णंति क्रीणासि क्रीणीथः क्रीणामि क्रीणीवः क्रीणीते क्रीणाते क्रीणते क्रीणीवे

मृ८५ ३

37

क्रीणाथे क्रीणीध्वे क्रीणे क्रीणीवहे विक्राय विक्रियतुः विक्रियुः विक्रेथ विक्रयिथ विक्रि
ये क्रेता क्रेष्यति क्रेष्यते क्रीणातु क्रीणीतात् क्रीणीतां क्रीणीतां अक्रीणात् अक्रीणीत
क्रीणीयात् क्रीणीत क्रीयात् क्रेषीष्ट अक्रैषीत् अक्रैष्ट अक्रेष्यत् अक्रेष्यत प्रीञ् तर्प
णे कांतौ च प्रीणाति प्रीणीते श्रीञ् पवने प्वादीनां ह्रस्वः शिति पूञ् लूञ् स्तॄञ् कॄञ् वृञ् धूञ्
शॄ पॄ वॄ भॄ मॄ दॄ जॄ झॄ धॄ नॄ कॄ ॠ गॄ री ली व्ली प्ली चतुर्विंशतीनां शिति पुनाति पुनीते पविता लू
ञ् छेदने लुनाति लुनीते स्तॄञ् आच्छादने स्तृणाति स्तृणीते तस्तार तस्तरतुः तस्तरे स्तरिता
स्तरीता स्तृणीयात् स्तृणीत स्तीर्यात् लिङ्सिचोरात्मनेपदेषु इड्वृञ्भ्यां ऋदंतात्परयोर्लि
ङ्सिचोरिड्वा स्यात् लिङि न दीर्घः स्तरिषीष्ट उभय स्तीर्षीष्ट सिचि च परस्मैपदेषु अस्तारीत्
अस्तारिष्टां अस्तरिष्ट अस्तरीष्ट अस्तीर्ष्ट वृञ् आवरणे वृणाति वृणीते ववार वव्रे वरि
ता वरीता उदोष्ठ्योत्वं वूर्यात् वरिषीष्ट वृषीष्ट अवारीत् अवारिष्टां अवरिष्ट अ
वरीष्ट [illegible] अवृर्ष्ट धूञ् कंपने धुनाति धुनीते धोता धविता अधावीत् अ

38

धोषात अघविष्ट अघोष्ट ग्रहउपादाने गृह्णाति गृह्णीते जग्राह ग्रहोलिटि दीर्घः एकाच्वो
ग्रहेविहितस्येटोदीर्घो नतुलिटि ग्रहीता गृह्णातु हलः श्नःशानज्झौ हलः परस्य श्नःशानजा
देशोहौ ग्रहाण गृह्णातु अग्रहीष्ट ततेतिनवृद्धिः अग्रहीत् अग्रहीषां अग्रहीष्ट अग्रहीषा
दःवला तां कुषनिष्कर्षे कुष्णाति कोषिता अशभोजने अश्नाति आश आशिता आशिष्यति निष्कोष
तुकते अश्नातु अशान मुषस्तेये मोषिता मुषाण ताअववोधने जानाति जज्ञौ हस्वूंभक्तो ह निरकौष
४ णीते वत्रे वव्रे वरिता वरीता अवरिष्ट अवरीष्ट अवृत इतिक्र्यादि चुरस्तेयेसस्वापपा निरकोट
शास्त्रपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्स्वार्थे पुंगतेतिगुणः स
नाद्यंता इतिधातुत्वेति प्राप्तादिगुणयादेशौ चोरयति णिचश्च णिजंतादात्मनेपदं कर्तृगामि
नि क्रियाफले चोरयते चोरयांचक्रे चोरयामास चोरयिष्यते चोरयेत् चोर्यात् चोरयिषीष्ट
णिश्रातिद्रवरूः णेचङीति ङसः छित्वं हलादिः शेषः दीर्घोलघोरित्यभ्यासस्य दीर्घः अचूचु २९
रत् अचूचुरत कथवाक्यप्रबंधे अतोलोपः अचः परस्मिन्पूर्वविधौ परनिमित्तोयजा

८

गति बुद्धि प्रत्यवसानार्थ शब्दकर्माकर्मकाणामणि कर्ता स णौ कर्म स्यात्

देशः स्थानिवत्स्यात्स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये इति स्थानिवत्त्वान्नोपधाह्रस्वः
कथयति अल्लोपित्वान्न दीर्घः सन्वद्भावो न अचकथत् गण संख्याने गणयति ई च गणः गण
यतेरभ्यासस्य ईत्स्याच्चङ्परे णौ अजीगणत् अजगणत् इति चुरादिः स्वतन्त्रः कर्ता क्रियायां
स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् तत्प्रयोजको हेतुश्च कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च
हेतुमति च प्रयोजकव्यापारे प्रेरणादौ वाच्ये धातोर्णिच् भवति भवन्तं प्रेरयति भावयति ओः पुयण्ज्य
परे सनि परे यदङ्गं तदवयवस्याभ्यासस्योत इत्स्यात् अवर्णपयण्जकारेषु वर्णपरेषु परतः अबी
भवत् ष्ठा गतिनिवृत्तौ अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ स्थापयति तिष्ठतेरित् उपधा
याश्चङ्परे णौ अतिष्ठिपत् घट चेष्टायां घटादयो मितः ज्ञपमिचश्च मितां ह्रस्वः घटादीनां
ज्ञपादीनां च णौ उपधाया ह्रस्वः घटयति अजीघटत् ज्ञप ज्ञाने ज्ञापने च ज्ञपयति अजि
ज्ञपत् इति णिजन्तप्रक्रिया धातोः कर्मणः समानकर्तृकादिच्छायां वा इति कर्मणो धातो

40

रिषतो ककर्तृकात्सन्नेच्छायां पठन्नकार्यं वाचिरहं सम्भ्रुक्षोः संतं सम्प्रयः तस्य च प्रथमस्ये
काचो हलो ऽजादेस्तु द्वितीयस्य सन्यतः अभ्यासस्यातइत्वं पठित पिपठिषति पिपठिषति कर्मणः
किंगमने नेच्छति समानकर्तृकात् किंशिष्याः पठेति तितिक्षति गर्हं वायहणो हकारमपि लुट्
सनोऽर्थत्व अरः सम्यार्द्धधातुके सस्तः स्यात् सस्वार्द्धधातुके अतुमिच्छति जिघत्सति
एकस्वरतिनेट् अजन्तानां सनि अजन्तानां हन्तेरजादेशो गमेश्च दीर्घो झलादौ सनि इ
कोझलि। इगन्ताज्झलादिः सन्किन्न भवेत् स्यात् स्यातोः कर्तुमिच्छति चिकीर्षति सतिग्रहगुहोश्च
ग्रहे गुहेरुगन्ताच्च सनि इट् न स्यात् बुभूषति इति सन्नन्ता धातोरेकाचो हलादेः क्रियास
मभिहारे यङ् वा न तु अन्यत्र पूर्ववदभ्यासो धातोरेकाचो हलादेर्यङ् गुणो यङ्लुकोः अभ्यास
स्य गुणो यङ्लुकोः किंच परतः डिरन्तता स्यात्मनेपदं शुनः ऊनरति शयेन वाभवति वोभूयते
वाभूयांच के अवोभयिष्ठ ति लं कोपि लोपः गत्वाणौ कौ हिल्लेश्च एव यङ् नतु क्रि २२

41

यास्समभिहारे दीर्घोऽकितः अकितोऽभ्यासस्य दीर्घो यङ्लुकोः कुटिलं वञ्चति वावञ्च्यते
यस्य हलः हलः परस्य लोपः आर्द्धधातुके आदेः परस्य अतो लोपः वावञ्चांचक्रे वावञ्चि
ता रीगृदुपधस्य च ऋदुपधस्य धातोरभ्यासस्य रीगागमो यङ्यङ्लुकोः वरीवृत्यते नृ
त्यादिश्चवत्तु ज्ञादा वाहलित्तिगरणत्वं नरीनृत्यते इतियङंता यङोऽचि च यङोऽचि प्रत्यये लुक्
स्याद्बहुकालं तं विनापि क्वचित् स्यात् यङो अनैमित्तिको यमंतरंगत्वाद्दादौ भवति ततः प्र
त्ययलक्षणेन यङंतत्वात् द्वित्वं अभ्यासकार्यं धातुत्वात् लडादयः शेषात्कर्तरि
परस्मैपदं चर्करीतं च सदादिगण ठात् शपो लुक् यङो वा यङंतात्परस्य हलादेः पि
तः सार्वधातुकस्य ईड्वास्यात् भूसुवोस्तिङि निषेधे यङ्लुकि भाषायां न वोभूतु तेतिक्ते
ति छंदसि निपातनात् बोभवीति बोभोति बोभूतः बोभुवति बोभवीषि बोभोषि बो
भूथ बोभवीमि बोभोमि बोभूवः बोभूमः बोभवांचकार बोभवं बभूव बोभवामा

स वोभविता वोभविष्यति वोभवीतु वोभूतात् वोभूतां वोभुवतु वोभूहि वोभवानि अ
वोभवीत् अवोभोत् अवोभूतां अवोभुवुः वोभूयात् वोभूयातां वोभूयुः वोभूपा
त् वोभूयास्तां वोभूयासुः गातिस्थेति सिचो लुक् यङो वेतीट् पक्षे गुणं वाधित्वा नित्यत्वा
त्वुक् अवोभवीत् अवोभोत् अवोभूतां अवोभुवुः अवोभविष्यत् इति लिवसरह
पऽ॥ उँता: सुपआत्मनः क्यच् इषिकर्मण एषितुरात्मसंवंधिनः सुवंतादिच्छायाम
र्थे क्यच्वा सुपोधातुप्रातिपदिकयोः एतयोरवयवस्य सुपो लुक् क्यचि च अवर्णस्य ई
त् आत्मनः पुत्रमिच्छति पुत्रीयति मांतप्रकृतिसुवंताद् अव्ययाच्च क्यन्न किमिच्छति त
इदमिच्छति स्वरिच्छति नः क्ये क्यचि क्यङि नांतमेव पदं नान्यत् नलोपः राजीयति
नांतमेवेति किं वाच्यति हलि च रपविति धातोरित्येव नेह दिवमिच्छति दिव्यति वस्य विभा
षा हलः परयोः वाच्च क्यङ्लोपो वार्धधातुके आदेः परस्य अतो लोपः तसमास्याति

43

वत्वाल्लवृत्पवग्गोन सविशिष्टिता सुविशिष्टिता काम्यच् उक्तविषये काम्यच् पुत्रमात्मनः
इच्छति पुत्रकाम्यति उपमानादाचारे उपमानादाचारेऽर्थे क्यच् पुत्रमिवाचरति पुत्रीयति
म छात्रं विष्णूयति द्विजं: सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः अतोगुणे कृष्ण इवाचरति ३
कृष्णति स्व इवाचरति स्वति सस्सौ अनुनासिकस्य क्विझलोः अनुनासिकांतस्योपधा
या दीर्घः स्यात् क्वौ झलादौ क्ङिति इदमिवाचरति इदामति राजेवाचरति राजानति पंथा
इवाचरति पथीनति कष्टाय क्रमणे चतुर्थ्यन्तात् कष्टशब्दादुत्साहेऽर्थे क्यङ् कष्टाय क्रमते
कष्टायते पापं कर्तुमुत्सहत इत्यर्थः शब्द वैर कलह अभ्र कण्व मेघेभ्यः करणे एभ्यः
कर्मभ्यः करोत्यर्थे क्यङ् शब्दं करोतीति शब्दायते तत्करोति तदाचष्टे इति णिच् णाविष्ठ
वत् प्रातिपदिकस्य इष्ठेयथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुब्लोपय
णादिलोपः प्रस्थस्फाद्यादेशभसंज्ञास्तद्वत् णावपि स्युरिति टेर्लोपः घटमाचष्टे वा घटय
घटं करोति घट

प्र

स्थः संतिष्ठते अवतिष्ठते प्रतिष्ठते वितिष्ठते अपह्नवे ज्ञः ६
अकर्मकाच्च सर्पिषो जानीते सर्पिषोपायेनैव नैतरसं

त्ति इति नामधातुत्र कृपा कं द्रुह्यिश्यो यक् एभ्यो धातुभ्यो नित्यं यक् स्यात् स्वार्थे कंडूयते
त्रविषयर्थेलो कंडूयति कंडूयते इत्यादि इति कंड्वादिः कर्त्तरि कर्म्मव्यतिहारे क्रियावि
निमये द्योत्ये कर्त्तर्यात्मनेपदं व्यतिलुनीते अन्यस्य योग्यं लवनं करोतीत्यर्थः न गति
हिंसार्थेभ्यः व्यतिगच्छंति व्यतिघ्नंति नेर्विशः निविशते परिव्यवेभ्यः क्रियः परि
क्रीणीते विक्रीणीते अवक्रीणीते विपराभ्यां जेः विजयते पराजयते समवप्रवि
भ्यः शतमपजानीते अपलपतीत्यर्थः उदश्चरः सकर्मकात् धर्म्ममुच्चरते उल्लं
घ्य गच्छतीत्यर्थः समस्तृतीयायुक्तात् रथेन संचरते दाणश्च सा चेच्चतुर्थ्यर्थे सप्र
दाणस्तृतीया तेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे दास्या संप्रयच्छते कामुकः पूर्ववत्सनः २२
सनः पूर्वो यो धातुस्तेन तुल्यं सनंतादप्यात्मनेपदं स्यात् एधिषिषते हलंतच्च इगंत
समीपाद्धलः परो झलादि सन् कित् निविविदिषते गमना दन्येतोपदेशे वनसाहसिक्य ७
आशिष्टव्यवहारेदानप्रयोगे चतुर्थ्यर्थे तृतीया

नियत्नप्रकथनोपयोगेषु कृञः गंधनं हिंसा उत्कुरुते सूचयतीत्यर्थः हरिमुपकुरुते सेव
ते परदारान् प्रकुरुते तेषु सहसा प्रवर्त्तते एधोदकस्योपस्कुरुते गुणमाधत्ते कथाः प्रकु
रुते प्रकथयति शतं प्रकुरुते धर्मार्थं विनियुंक्ते एषु किं घटं करोति भुजोऽनवने ओदनं
भुंक्ते अनवने किं महीं भुनक्ति इत्यात्मनेपदप्रक्रिया अनुपराभ्यां कृञः कर्त्तृगे च
फले गंधनादौ च परस्मैपदं स्यात् अनुकरोति पराकरोति अभिप्रत्यतिभ्यः
क्षिपः क्षिप प्रेरणे स्वरितेत् अभिक्षिपति प्राद्वहः प्रवहति परेर्मृषः परिमृष्यति
व्याङ्परिभ्यो रमः रमु क्रीडायां विरमति उपाच्च यज्ञदत्तमुपरमति उपरमयतीत्यर्थः
अंतर्भावितण्यर्थोयं इति परस्मैपदप्रक्रिया भावकर्मणोः लस्यात्मनेपदं सार्वधातुके य
क् भावकर्मवाचिनि धातोर्यक् सार्वधातुके भावः क्रिया सा च भावार्थकत्वकारे
णोच्यते तत्र युष्मदस्मद्भ्यां सामानाधिकरण्याभावात् प्रथमपुरुषः तिङ्वाच्य
अवद्वे पएं मर्त्तनं रूपे

क्रियायां अजन्तस्य तेन हितां घप्रतीते चिण्वदिव नादिष्ठिं ते च वच नमेवो त्सर्गतः त्वया
मया अन्यैश्च वा भूयते बभूवे स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रह
दृशां वा चिण्वदिट् च उपदेशे योऽच् तदन्तानां हनादीनां च चिण्वत्कार्यं वा स्यात्
स्यादिषु भावकर्मणोर्गम्यमानयोः स्यादीनां मिडागमश्च चिण्वच्चावपदे अयमिट्
चिण्वद्भावात् वृद्धिः भाविता भविता भाविष्यते भविष्यते अभाविष्यत अभविष्यत भाविषीष्ट भवि[illegible]
भविषीष्ट चिण्भावकर्मणोः लुङि भावकर्मवाचिनि तशब्दे परे चिण् स्यात् अभावि
अभाविष्यत अभविष्यत अकर्मकोऽप्युपसर्गवशात्सकर्मकः अनुभूतेः आनं प
दश्वैरेण त्वया मया वा अनुभूयते अनुभूयेते त्वमनुभूयसे अहमनुभूये अतभा
वि अनुभाविषातां णिलोपः भाव्यते भावयांचक्रे भावयांबभूवे भावयामासे २८
भावयिता चिण्वदिट् आभीयत्वेनासिद्धत्वाण्णिलोपः भाविता भाविष्यते भावयिष्य

ते भाव्यतां अभाव्यत भाव्यते भाविषीष्ट भावयिषीष्ट अभावि अभाविषातां अ
भावयिषातां बुभूष्यते बुभूषांचक्रे बुभूषिता बुभूषिष्यते बोभूयते इत्यादि अस्तु
त्सार्वधातुक कयोर्दीर्घः स्तूयते ष्टिञुः स्ताविता स्तोता स्ताविष्यते स्तोष्यते अस्तावि अ
स्ताविषातां अस्तोषातां अस्तृ ते ऋणोतेः तिष्ठतः अर्यते स्मृ स्मर ऐ स्मर्यते सस्मरे
उपदेशग्रहणाच्छिवेदिट् आरिता अर्ता स्मारिता स्मर्ता न लोपः स्नस्यते इदितस्सं
घते संप्रसारणं इज्यते तनोतेर्यकि तनोतेरातं वस्यात् चचितापते तन्यते तयातु ता
पेव तपः पंक्तिशानस्मात् कर्मकर्तरि तु तप्यते अतत्तप्त पायेनद्युमानस्य तीर्वं दीयते
धीयते ददे अतो कुविण्लतेः आर्दं तानां ... क्षिति चिकीर्षति दायिता
दाता दायिषीष्ट दासीष्ट अदायि अदायिषातां भज्यते भंजेश्च चिलिनतो कोवा अ
भाजि अभंजि लभ्यते विभाषा विस्वमलोः लभेर्तुम् अलंभि अलाभि यदा कर्मे

कर्मण्यपाक्रियमाणतुल्यक्रियः

वत्कर्तृत्वेन विवक्षितं तदा स कर्मकर्त्ता णोपि अकर्मकत्वात्कर्तरि भावे च लः कर्मवत्क
र्मणा तुल्यक्रियः कर्त्ता कर्मवत्स्यात् कार्यातिदेशोयं तेन यगात्मनेपदं चिण् चिण्वदिट्
स्युः पच्यते फलं भिद्यते काष्ठं अपाचि अभेदि भावे भिद्यते काष्ठेन इति भावकर्मप्र
क्रिया ॥ अभिज्ञावचने लृट् स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् लङोऽप
वादः वस निवासे स्मरसि कृष्ण गोकुले वत्स्यामः एवं बुध्यसे चेतसि चा नपदि यद्योगे तु
स्रैन अभिज्ञानासि यद्वने अभुंज्महि लङ् स्मे लिटोऽपवादः यजति स्म युधिष्ठिरः
वर्त्तमानसामीप्ये वर्त्तमानवद्वा वर्त्तमाने ये प्रत्यया उक्तास्ते वर्त्तमानसामीप्ये भूते
भविष्यति वा स्युः कदा आगतोसि अयमागच्छामि आगमं वा कदा गमिष्यसि २५
एष गच्छामि गमिष्यामि वा हेतुहेतुमतोर्लिङ् वा स्यात् हेतुमन्नमेवे स्युरेवं यथा प्राक् कृ ९
ष्णं नमेति चेत्सुखं यास्यति भविष्यति चेद्बाध्यते नेहहंतीति पलायते विधिनिमंत्रणेति लि

चेतव्यमप्रयनीयो वा धर्मस्तस्य केलिमरसुवसंख्याने कर्मे लिमाप्रत्ययाः यत्कृत्याः
स्तर्थः भिदेलिमाः कर्मण्यं कर्मणि प्रत्ययः कृत्यल्युटोऽन्यत्र बहुलम् क्वचित्प्रवृत्तिः क्व
चिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव विधेर्विधानं बहुधा समीक्ष्य चतुर्वि
धं बाहुलकं वदंति स्नात्यनेन स्नानीयं चूर्णं दीयते स्मै दानीयो विप्रः अ
चो यत् चेयं जेयं ईद्यति आतः एः देयं ग्लेयं पोरदुपधात् पवर्गान्तादुप
धात् यत् एप्रतोप्यवादः शप्यम् लभ्यम् एतिस्तुशासुवृदृजुषः क्यप् कृत्यस्यपि
ति कृति तुक् ह्रस्वः स्तुत्यः शास् अनुशिष्टौ शास इदङ्हलोः शास उपधाया इत्स्माद्
ङि. हलादौ क्ङिति शिष्यः वृत्यः दृत्यः आदृत्य आदृत्यः जुष्यो वृत्तेति सत्वनेयं जुष
ते जोष्यं जुष्यः मृजूः यमार्जने मृजेर्विभाषा मृजेः क्यप् मृज्यः आहलोर्ण्यत् आ २८
वर्णान्तात् हलन्तात् ण्यत् कार्यं धार्यं हार्यं चजोः कुघिण्यतोः निष्ठायामनिट् इति वक्त

उ. विधिप्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्त्तनं यजेत निमंत्रणं नियोगकरणं आवश्य
के श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तनं इह भुंजीत आमंत्रणं कामचारानुज्ञा आसी
त अधीष्टः सत्कारपूर्वको व्यापारः पुत्रमध्यापयेत् संप्रश्नः किंभो वेदमधीयी
य उत तर्कं प्रार्थनायां भो भोजनं लभेय एवं लोट् इति लकारार्थप्रक्रिया इति
श्री वरदराजभट्टविरचितायां लघुकौमुद्यां तिङंतप्रक्रिया समाप्तम्
धातोः आतृतीयाध्यायांतं ये प्रत्ययास्ते धातोः परे स्युः कृदतिङ् इति कृत्संज्ञा वा
सरूपोऽस्त्रियाम् अस्मिन् धात्वधिकारे सरूपोऽपवादः प्रत्यय उत्सर्गस्य वा बाधकः
स्त्र्यधिकारोक्तं विना कृत्याः एवुल्तृचावित्यतः प्राक् कृत्यसंज्ञाः स्युः कर्त्तरि कृ
त् इति प्राप्ते तयोरेव कृत्यक्तखलर्थाः एते भावकर्मणोरेव स्युः तव्यत्तव्यानीयरः
धातोरेते स्युः एधितव्यं एधनीयं त्वया भावे औत्सर्गिकमेकवचनं क्लीबत्वं च